श्च विजयस्तनु दूषकः॥ इन्द्रियघ्नाश्च विजयो नवमः परिकीर्त्तितः॥ तेषामेव क्रमाद्रूपनव नामानि यानि तु॥ पृथुस्ताम
प्राप्नैव शान्तिदा मपराणि वै॥ द्वितीयः प्रथम प्रोक्तः द्वितीयो जलसंभवः॥ पवना उन्नीततो वोनु यजमानस्ततः परः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोरवसम्भवना मातु बधु स॰ परिकीर्त्तितः॥ सोमस्य स प्तमः प्रोक्तो आदित्यस्तु तथाष्टमः॥ विजयो नाम कलशो यो
सौनव मउच्यते॥ स तु पंचमुखः प्रोक्तो महादेवस्वरूपकः॥ पार्श्वेपंच वक्त्रेषु पंच वक्त्रस्वयं तथा॥ वथा कामं स्थितः
सम्यग्वामदेवादिनामतः॥ मराउलस्यतु पश्चात्तः पश्चिवक्रघटं यजेत्॥ क्षितौन्द्र पूर्वतो मध्ये पश्चिमे जल सम्भवं॥ वाय
वे वायवं मध्ये आग्नेय्यां ह्यग्निसंभवं॥ सोमसुत्तरतो योज्यं सूर्यं दक्षिणतो न्यसेत्॥ मध्ये वं कलशाग्ने व तेषु चैतानि
चिन्तयेत्॥ कलशानां मुखे ब्रह्मा ग्रीवायां शंकरः स्थितः॥ मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः॥ दिक्पाल दे 292
वताः सर्वे वेष्टयन्ति दिशो दश॥ कुक्षौ च सागराः सप्त सप्तद्वीपाश्च संस्थिताः॥ नक्षत्राणि ग्रहाः सर्वे तथैव कुलदेवताः॥
गंगाद्याः सर्वनद्यश्च वेदाश्चत्वार एव च॥ कलशेषु संस्थिताः सर्वे तेषु तानि विचिन्तयेत्॥ रत्नानि सर्वबीजानि २८४
पुष्पाणि च फलानि च॥ रत्नं वैडूर्य्य मुक्तानि मत्स्य पद्मे तु स्फाटिके॥ सर्व रत्नमयं विल्वं नागरे तु म्बरस्तथा॥ बी
जपूरकबीजानि कामाका म्रातदाडिमो॥ यवं शालि च्च नीवारं गोधूमं सित सर्षपं॥ कुंकुमागुरु कर्पूरं मदं नरोचनं त
था॥ चन्दनं च तथा सार्द्धी मेला कुष्ठं तथोत्तमं॥ कर्पूरं चन्द्रपत्रञ्च जलं निर्यास का ख्जं॥ शैलेयं चन्दनं जातिपत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीवृक्षपार्थिवः॥ निमित्तानि निमित्तानि लक्षयेत्तत्र विद्भिः॥ दैवज्ञः कंचुकामात्यावन्दिपौरजनैर्वृतः॥ वादित्रघो
षैस्तु मुलैस्तथा तौर्य्यत्रिकैः शुभैः॥ कृत्वाशेषे पुनः शान्तिमाशीर्वाचं च्चरे द्विजान्॥ पूजयित्वा विधायतस्मान्तु द
क्षिणां कनकाम्बुतः॥ धान्यानि वाथ वासांसि दत्वा कुर्य्याद्विसर्जनं॥ ततः शेषजलैः सर्व्वानमात्यादीन्नृपो हितः॥
सेचयेत्तु रंगानि सेनां चापि स्वराष्ट्रकं॥ एवं कृत्वा नृपः पुष्याच्त्रिरात्रं संयतो भवेत्॥ मांसमैथुनहीनस्तु कुर्य्यान्नं मंग
लसेचनं॥ पुष्यान्यत्र शुक्लानुक्रतीयाय दिलम्यते॥ तस्या पूज्यास्सदा चण्डी शक्रेण सदेवतु पञ्चालिकाविवालासैः शिशुना कौतु
केस्तथा॥ वैवाहिकेन विधिना मोदयन्त्र गिंडकां शिवां॥ चतुःपथेषु सर्व्वेषु देवदेवीगृहेषु च॥ एवं कृत्वा महाशान्तिं यागपुष्याभिषेचनं॥ च
तुरङ्गैः समं राजा भार्य्याभिस्तेन पैः सह॥ राज्यमण्डलसंयुक्तः परत्रेह च मोदते॥ नातः परतरो यज्ञो नातः परतरोत्सवः॥ नातः परतरा शान्तिर्ना
तः परतरं शिवं॥ अनेनैव विधानेन नृपतेरभिषेचनं॥ युवराज्याभिषेकं च कुर्य्याद्राजपुरोहितः॥ नृपाभिषेककरणमादौ यदि समाचरे
त्॥ अनेनैव विधानेन स्थिरस्स्यात्स नृपात्तदा॥ अयं यज्ञः समुद्दिष्टः शक्रार्थं च ब्रह्मणा पुरा॥ एवं यज्ञं नृपो कृत्वा परत्रेह न सीदति॥ ॥
इति श्रीकालिकापुराणे पुष्याभिषेक पञ्चाशीतितमोध्याय॥८५॥ ॥श्रौर्व्व उवाच॥ ॥अथातः सम्प्रवक्ष्यामि राजेन्द्र शक्रोत्थान ध्वजोत्सवं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्मात्तस्मान्नृपतिर्व्याति न कदाचित्पराभवं ॥ रवौ हरिस्थे द्वादश्यां श्रवणेन विडौजसं ॥ आराधयेत् नृपः सम्यक् सर्व्वविघ्नोपशा-
न्तये ॥ राजोपरिश्वसेनामसुवस्त्रासोपरस्त्रयः ॥ नृपस्तेनोदमस्त्रिलोयत्नतः प्रवर्त्तितः पुरा ॥ प्रावृट्काले च नभसि द्वादश्यामशितेतरे ॥
पुरोहितो वृधुविधैर्वाद्यैर्गीतैः समन्वितः ॥ प्रथमं शक्रकेतत्वर्थं वृक्षमामन्त्र्य वर्द्धयेत् ॥ साम्वत्सरो वर्द्धकिश्च कृतमंगलकौतुकः ॥ उ-
द्यानदेवतागारे विमाने साधुमध्यतः ॥ ये जातास्तरवस्तास्तु वर्ज्जयेत्तान्सदा ध्वजे ॥ वहुवल्लीस्फुभं स्फुलं वहुकराटकसंयुतं । कुब्जं वृक्षा-
दनीयुक्तं लताछन्नं तरुं त्यजेत् ॥ पक्षिवाससमाकीर्णं कोटरैर्वहुभिर्युतं । पवनानलविध्वस्तं तरुं यत्नेन वर्ज्जयेत् ॥ नारीसंज्ञाश्च
ये वृक्षाश्चातिह्रस्वाश्चातिकृशाः ॥ तान्सदा वर्ज्जयेद्धीरः सर्वदा शक्रपूजने ॥ अर्ज्जुनोश्वत्थकर्णश्च प्रियकोधव एव च ॥ उदुम्बरश्च पञ्चै-
ते केतवर्थे उत्तमाः स्मृताः ॥ श्मशानदेवदार्वाद्याः शालाद्यास्तस्तथा ॥ प्रशस्तास्तु परिग्राह्या नाप्रशस्ताः कदाचन ॥ गत्वा वृक्षं ततो राज्ञो
स्पृष्ट्वा मंत्रमिमं जपेत् ॥ यानि वृक्षेनुभूतानि तेभ्यः स्वस्ति नमो नमः ॥ उपकारं गृहीत्वेमं महेन्द्रध्वजगम्यतां ॥ पार्थिवस्त्वां वजय-
ति स्वस्तिते स्तुनगोत्तम ॥ ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यतां ॥ ततो परेह्नि तं छित्वा मूलमष्टांगुलं पुनः ॥ जले क्षिपेत्तथाग्रस्य छि-
त्वैवं चतुरंगुलं ॥ ततो नीत्वा पुरद्वारं केतुं निर्म्मायतन्नवै ॥ शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् ॥ द्वाविंशद्धस्तमानं तु अधमः के-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पैत पैवच॥ वचा धात्रीसमंजीष्टांतुरुष्कं मकुलाष्टकं॥ दुर्वांलोहनिकां भद्रांतालमूल शतावरी॥ वर्णानांश व
लां क्षुद्रांस हदेत्वाग जांकुशा॥ पूर्वकोबांधितां गाढं गुञ्जां मुरिलिकालसो॥ रूपामाकं गज दन्तं चव्रतत पुष्पं पुनर्न
वा॥ ब्राह्मीदेवी शिवां रुद्रां सर्वगन्धा निकान्तथा॥ एभिः सहस्र मुभाने तान्कलशेषु विधापयेत॥ कलशेषु यथोद्दिष्टं वि
ष्णुं भगदाधरं॥ यथाक्रमं पूजयित्वा शंभुं मुख्यान्तथा यजेत॥ प्रासादेन तु मन्त्रेण शंभुं तत्रेण शंकरं॥ प्रथमं पूजये
न्मध्यमानानैवेद्य वेदनैः॥ दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत॥ पूर्ववाहः स्थापितेषु गृहाणां कलशे
ग्५ षु च॥ नवग्रहान्नजयित्वा मातृन्मातृघटेषु च॥ सर्वदेवा घटे पूज्या घटाश्च वा पृथक् पृथक्॥ नवैव तत्र पूर्वोक्ताः
सूक्ता मुख्यतमान्तप। मत्स्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः॥ यावकैः पायसैश्चापि यथासंभव योजितैः॥ पु
ष्पमालानावन्दपतिः पूजयेत्सकलान्सुरान्॥ दक्षिणे मण्डलस्याथ कुण्डनिर्मां यथाबलैः॥ समिद्भिः शाल्मलिसिद्धार्थै
घृतैर्द्रवीक्ष्यते तत्पया॥ केवलैश्च तथा राजैः पूजितात्कलशान्सुरान्॥ होमेन तोषयेद्भक्त्या स्वपत्सहितपुरोहितः॥ होमान्
ते मण्डले दिव्यावेदिकायां सपादुका॥ रोचनां क्षमलंकान्तां तथा सर्वांन्त्रि योजयेत॥ ह्यमां च कुल मंगुल्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालिका
२८५

कुर्य्याप दिगन्तप्या॥ चतुरस्रं चतुर्द्वारं पद्मकं त्रिसंज्ञकं॥ त्रिलेशान पद्ममध्यगो मुष्टिकविनायकैः॥ श्रीःश्री वृक्ष
धरीरो तालखामीदेवसुतान्विताः॥ रत्नैः सर्वैरलंकारैः पट्टिकापर्य्यं द्विहस्तकं॥ हस्तविस्तारमुक्तायं नवहस्तं दशाङ्गुलं॥ स्या
नार्थं सा द्विहस्तैस्तु पद्मवृत्तासनान्वितं॥ सप्याचतुर्ङ्गुलादीर्घा धनुर्म्मानन्तु पीठकं॥ गजसिंहकृतापेपंहे मरत्नविभू
षितं॥ सिंहारव्य साद्र्धवित्तारदाडोसनमथापिवा॥ व्याघ्रचित्रकपट्टैर्वा उपधानानि कारयेत्॥ श्वमैर्वानिर्म्मितैः श्वे
वमष्टधूलकपूरितान्॥ सप्पादैर्घ्याधविस्तीर्णाश्चतुर्हस्तामुलक्षणा॥ विस्तारस्याधिकमिकृत्तिरूपस्पगुरुविद्यया॥
श्वद्व्रचन्द्रसमं कुर्य्यात् यानमाचतुरस्रकं॥ उपधानानि सप्पा पांरत्नादिमूलभेदतः॥ बोडशैवतु कार्य्याणि वर्णविचित्र
सुतानि च॥ यानं सिंहासनं पट्टशय्यापकरणादिकं॥ राज्ञो नूतनयोग्यन्तु वेद्याउन्तरतो न्यसेत्॥ तेषामनुपश्चिमस्वर्ण
रत्नौघ निचितेवरे॥ पर्य्यङ्कं पञ्चदैर्घ्या यानि मितन्तु महातेरे॥ दुर्गांछादनसंयुक्तं चर्म्मावृतं चतुष्पदं॥ वृषभस्य
तप्योर्णायांसिंहशार्दूलयोरपि॥ पादपीठं रत्नपीठे पादावेति यथापिवः॥ तस्मिन्पर्य्यङ्कुषु शे च चर्म्मखण्ड चतुष्पदे॥
नानालंकारभूषाढ्यं नृपतिरत्नमालिनं॥ स्नापयेव्रालतो ज्ञाद्वराजानं सुखसंगतं॥ सन्वीतकम्बलं हृष्टरत्न

294
कालि
२८५
३१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्त्रावशोभितं॥ कलशोर्द्ध्वलिपुष्पाद्यैः सर्पिःपूर्णैस्तु स्थापयेत्॥ अष्टौ षोडशाविंशाश्च शतमस्माधिकं चव॥ कलशानां
समाख्याता स्त्राविवात्पोत्तरोत्तरा॥ जयकल्याणदं सम्यक् वैर्मङ्गलाश्चेष्वशां भवेः॥ वेद्मवेरण्य दिक्पालैर्ग्रहमन्त्रैश्च मात-
केः॥ आज्यं तेजः समुद्दिष्टं माज्यं पापहरं परं॥ आज्यं सुराणामाहारं सर्व्वमाज्ये प्रतिष्ठिताः॥ भौमान्तरीक्षं दिव्यं वा यत्ते
कल्मषमागतं॥ सर्व्वं तदाज्यसंस्पर्शा प्रणाशमुपगच्छति॥ ततो पञ्चोपमाचारान्तु कम्बलं वस्त्रमेव च॥ कलशैः स्थापयेद्
पं पुष्पैस्त्वानाम्बुपूरितैः॥ एभिर्मन्त्रैर्नरश्रेष्ठ नत्वतत्वार्प्य साधकैः॥ ॥मन्त्रः॥ ॥ॐ सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः
पुरातनः॥ ब्रह्मा विष्णुश्च रुद्रश्च दिक्पालाः समरुद्गणाः॥ आदित्या वसवो रुद्रा अश्विनयोः भिषग्वरौ॥ अदितिर्देव
माता च स्वाहा लक्ष्मीः सरस्वती॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा सिनीवाली कुहूस्तथा॥ दितिश्च सुरसा चैव विनता कद्रुरेव च॥
देवपत्न्यश्च लोके या देवमातर एव च॥ सर्व्वास्त्वामभिषिञ्चन्तु शुभाश्चाप्सरसा गणाः॥ नक्षत्राणि मुहूर्त्ताश्च पक्षा-
होरात्रसन्धयः॥ सम्वत्सरा दिनेशाश्च कलाकाष्ठाक्षणा लवाः॥ सर्व्वास्त्वामभिषिञ्चन्तु कालस्यावयवास्तथा॥ वैमानि-
काः सुरगणाः सर्ण सि सागरैस्सह॥ सरितश्च महाभागा नागाः किंपुरुषास्तथा॥ वैखानसा महाभागा द्विजा वैहायसाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पे॥ कश्यपः सपुदारश्च धुर्वंस्थानानियानितु॥ मरीचिरत्रिपुलहः पुलस्त्यः क्रतुरङ्गिराः॥ भृगुः सनत्कुमारश्च सनक
स्तु सनन्दकः॥ सनातनः सनन्दश्च जैगीषव्यो भनन्दनः॥ एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ॥ दुर्वासा दुर्विनीत
श्च करावः कात्यायनस्तथा॥ मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः॥ और्वः समवर्तकश्चैव च्यवनो हि पराशरः॥ द्वैपा
यनो यवक्रीडो देवराः तः सवानुजः॥ एते चान्ये च बहवो वेदव्रतपरायणाः॥ सशिष्यास्त्वाभिषिञ्चन्तु सदा राज्ञस्तपोधनाः॥ पर्वता
स्तु रवौ रम्यः पुण्यान्यायतनानि च॥ प्रजापतिः दितिश्चैव गावो विश्वस्य मातरः॥ तापना निचसर्वाणि दिव्यालोकाश्च 295
रा श्च राः॥ अग्नयः पितरस्तारा जीमूताः खं दिशो दश॥ एते चान्ये च बहवः पुण्यसंकीर्तना शुभाः॥ तोयैस्त्वामभिषिञ्चन्तु ज्योति
सर्वोत्पात निवर्हणैः॥ इत्येवं शुभयैर्मन्त्रैरेतैर्हुत्वैस्तपापैरेः॥ सोऽरैर्न्नो राघणो मन्त्रैर्वृत्ते न्द्रेतै इसंभवैः॥ आपो हि ष्ठा हिर २८६
ण्य पतिशं भवे तिसुरे ति च॥ मानस्तोके ति मंत्रेण गंधद्वारेत्यनेन च॥ सर्वमङ्गल मंगल्यैः क्वीश्चते ग्रह योगिभिः॥ इत्येवं
स्नानमासाद्य गात्रमावर्त्य कम्बलैः॥ सर्वमङ्गल मंत्रेण वस्त्रकाण्यासकं च पात॥ आचम्य च ततो देवं गुरुं विप्रांश्च पूज
येत्॥ ध्वजं छत्रं चामरं च चराणन चानर गजस्तथा॥ मंत्रं जप्त्वा धारयेत्तु ततो गच्छे हुताशनं॥ तत्र गत्वा वह्निमध्ये वह्नेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुरूच्यते ॥ दाविंशानुतनाज्यायान् द्विचत्वारिंशादेव तु ॥ ततोधिकः समाख्याता द्वापंचाशन्नतो मत [illegible]ः ॥ कुमार्य्यः पंचकर्त्तव्या
शाक्रस्यान्तपसन्नम ॥ शालमर्य्यास्तुताः सर्व्वाश्चपरोः शाक्रमातृकाः ॥ केतोः पादप्रमाणेन कार्य्या शाक्रकुमारिकाः ॥ मातृका द्रंपु
माणास्तु मंत्रहस्तच्चूपतथा ॥ एवं कृत्वा कुमारीश्च मातृकाः केतुरेव च ॥ एकादश्यां सिते पक्षे पष्ठिन्तामधिवासयेत् ॥ अधिवास्यंत
पर्णिगन्धद्वारादिमंत्रकैः ॥ द्वाराश्रया मण्डलकृत्वा वासवं विस्तृतात्मकं ॥ अश्रुतं पूजयित्वा तु शाक्रपश्चात्प्रपूजयेत् ॥ शाक्रस्य प्रति
मां कुर्य्यात्काञ्चनीं दारवीं च वा ॥ अग्नितेजसमूता घ्यासर्व्वाभावेन्तु मृन्मयी ॥ मण्डलस्य च मध्येतु पूजयित्वा विधानतः ॥ ततः शुभेमु
हूर्तेनु केतुमुत्थापयेन्नृपः ॥ वज्रहस्तसुरारि च्चू वहुनेत्र पुरन्दर ॥ क्षमार्थं सर्व्वलोकस्य पूजये प्रतिगृह्यताम् ॥ एह्येहि सर्व्वामरसिद्धसा
ध्योर् अभिष्टितो वज्रधरो महेन्द्र ॥ सम्प्राप्तस्त्वं अग्नवणाय पादे गृहाणे पूजां भगवन् नमस्ते ॥ एवमुक्त्वा रत्नत्रोत्नै दहन प्लवनादिभिः ॥ इन्द्रमंत्रे
णातंत्रेणानानानैवद्यवेदनैः ॥ अपूपैः पायसैराजैगुडै अन्नाभिरेव च ॥ भक्ष्यै भोज्यैश्च विविधैः पूजयेच्छ्री विवृद्धये ॥ घटेषु दत्वा दिक्पा
लानग्रहांश्च परिपूजयेत् ॥ साध्यादीन्सकलान् सर्व्वा मातृः सर्व्वास्तु पहत् ॥ ततः शुभमुहूर्तेनु ज्ञानि वृद्धिकसंयुतः ॥ केतुस्थापन भू
मिन्तु पञ्चवेद्याश्च पश्चिमे ॥ विप्रैः पुरोहितैः सार्द्धं गच्छे द्राजा सुमङ्गलैः ॥ रज्जुभिर्व्वहुभिर्व्वद्ध्वा यन्त्रं भिः सुसमाटकं ॥ कुमारीभिस्तु सं
युक्तां दिक्पालानां च पट्टकैः ॥ वृहस्पतिरनन्तस्य नानाद्रव्य सुपूजितैः ॥ यथा वर्णा यथा देशं पोजिते ध्वज वेष्टितैः ॥ युक्तं तं किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालिका
२८८

किणीजालसहस्रैश्च चामरैः॥ भूषितं मुकुलै रम्यैर्माल्यैर्बहुविधैस्तथा॥ बहुपुष्पैः सुगन्धैश्च भूषितं रम्यमालया॥९
चित्रमाल्याम्बरैश्चापि चतुर्भिः परितोरणैः॥ उत्थापयेन्महाकेतुं राजकीयाः शनैः शनैः॥ तमुत्थाप्य महाकेतुं पूजितं मण्डलान्तरे॥
प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयेत्॥ यजेत्तु पूर्ववत्तत्र शचीं मातरमेव च॥ पुष्करं वज्रपत्रं च वज्रमैरावतं तथा॥ उग्राश्चाप
प्यदिक्पालाः सर्वाश्च गणदेवताः॥ अर्घ्यपाद्यैः पूजयेत्तु बलिभिः पायसादिभिः॥ पूजितानां च देवानां तेषां होमं समाचरेत्॥ होमान्ते तु ब
लिं दद्याद्वासवाय महात्मना॥ तिलाज्यतश्चाक्षतश्च पुष्पं दुर्वति पैव च॥ एतैस्तु जुहुयात् देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः॥ ततो होम 296 पुल्ला
वसाने तु भोजयेदपि सद्द्विजान्॥ एवं संपूजयेद्देवान् सप्तरात्रं दिने दिने॥ ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः॥ सर्वत्र शक्रपूजासु के६
यत्नः सुपरिकीर्तितः॥ त्रातारमिति मन्त्रो वै वासवस्य प्रियः परः॥ एवं कृत्वा दिवाभागे श्राद्धोत्थापनमादितः॥ श्रवणर्क्षयुतायां २८८
तु द्वादश्यां पार्थिवस्स्वयं॥ अन्त्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत्॥ सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति॥ षण्मासात्मृत्युमा ९८५
प्नोति राजा दृष्ट्वा विसर्जनं॥ शक्रस्य नृपशार्दूल तस्मान्नेक्षेत तं नृपः॥ विसर्जनसमं त्रायं सुरादिभिरुदीरितः॥ सार्द्धं सुराः सुरग
रोः पुरन्दरस्य शतक्रतोः॥ उपकारं ग्रहणे नमं महेन्द्रध्वजगम्यतां॥ सूतकेतु सुपक्षेवारे भौमस्य वैश्वानेः॥ भूमिकम्पादिकोत्पाते वास
वन्न विसर्जयेत्॥ उत्पाते सम्प्राप्ते तु तथा पल्लवदर्शने॥ अतीत्य यामिनीं यामाहोत्यर्क्षेपि विसर्जयेत्॥ सुतकत्वपसंप्रा

३१५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रव्रतीते मृतके पुनः॥ यस्मिन्नस्मिन् दिने चैव सूतकान्ते विसर्जयेत्॥ तथारक्षेन्द्रकेतुपतनिशकुलान्नथा॥ नकेतोन्ट
पश्चाद्दलयावन्न हि विसर्ज्जनं॥ शनैः शनैः पातयन्तु यथा स्थापनमादितः॥ हतं तथाङ्ग्यथा भग्ने केतौ मृत्युमवाप्नुयात्॥ विसृ
ज्य शक्रकेतुं तु सालंकारं तथा निशि॥ क्षिपेदनेन मन्त्रेण त्वगाधसलिले न्टपः॥ तिष्ठ केतो यथाकालं यावत्संवत्सरं पुनः॥ भवाय
सर्वलोकानामन्तरायविनाशने॥ उत्थापयेत्तु ध्यय देवैः लोकस्य वै पुनः॥ रहोविसर्जयेत्केतुं विधमायप्रपूजने॥ एवं यः कुरुते पू
जां वासवस्य महात्मनः॥ स चिरं पृथिवीं भुक्त्वा वासवलोकमाप्नुयात्॥ न तस्य राज्ये दुर्भिक्षं नेतयो नाप्य धर्म्मकृत्॥ स्यात्तस्मि
न्निमृत्युर्नाकाले जनानां तत्र जायते॥ न तु स्मः कोपि नाम्यास्ति प्रियः शक्रस्य पार्थिव॥ तस्य पूजा केशवाद्या केशवाद्या प्र्व
तत्रगा॥ सकलकलुषहारी व्याधिदुर्भिक्षनाशं सकलभवनिवेशं सर्वसौभाग्यकारि॥ सुरपतिगृहगामी द्यर्चनं
राक्रकेतोः प्रतिशरदमनेकैः पूजयेच्छ्रीविवृद्ध्यै॥ ॥इति श्रीकालिकापुराणे शक्रध्वजाबद्धसीतितमोध्यायः॥ ८९॥
और्व उवाच॥ ॥ज्येष्ठं दशहरायां तु विष्णोरिष्टं नृप स्मृतम्॥ येन वा विधिना कार्य्या से विष्णोर्नृपैः सदा॥ प्रसन्नं पार्थिवं कु
र्य्यात् स्तुति मां कांचनी हरेः॥ अश्मते जोमयी वापि दारवी वा शिलामयी॥ तां प्रतिष्ठाप्य विधिना मानोमानैः स्तुशिल्पिभिः॥ प्रतिष्ठा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधिवत्तस्याः कुर्य्याद्विप्रपुरोहितैः ॥ तां स्वस्थापस्वगात्रेषु प्रतिमां निम्नगादिषु ॥ वासुदेवस्य वीजेन पूर्वोक्तविधिनाल्प
प ॥ सर्व्वोपचारैर्भक्त्यानुवासुदेवं प्रपूजयेत ॥ पूजान्ते संस्कृते वह्नौ कुण्डमध्यस्थितो द्विजः ॥ आज्यैः सहस्रं जुहुयादाहुती
नां हरेः प्रियैः ॥ संपूज्य वासुदेवन्तु होमं कृत्वा ततो द्विजः ॥ नृपस्यानुमते तान्तु प्रतिमां मण्डपे नयेत् ॥ प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा
दक्षिणपाणिना ॥ प्राणप्रतिष्ठां कुर्व्वीत तस्य देवस्य वै हरेः ॥ कृतायान्तु प्रतिष्ठायां प्राणानां नृपसत्तम ॥ विष्णुप्राणास्ताः प्रति
माः प्रयान्ति नियतं स्वयं ॥ प्राणेष्वपागतेष्वस्यां देवत्वं नियतं भवेत् ॥ प्रतिष्ठायान्तु प्राणानां कर्त्तव्यं प्रतिमासु च ॥ यथापूर्व्वं तथा भ
वः स्वर्णादीनां न विच्युता ॥ अन्येषामपि देवानां प्रतिमासु च पार्थिव ॥ प्राणप्रतिष्ठा कर्त्तव्या तस्या देवत्वसिद्धये ॥ सुवर्णान्तु सुवर्णा
स्यान्तथा दारुशिलाजिना ॥ अमन्त्रमुद्ररूपं वा प्राणस्थाने मृते सदा ॥ वासुदेवस्य वीजेन तद्विष्णोरितपनेन च ॥ तथैवांगानि मं
त्राणि प्रतिष्ठायां समुच्चरेत् ॥ तथैव हृदयं गुह्यं दत्वाशाप्य च मंत्रवित् ॥ एभिर्मन्त्रैस्तु हृदये प्रतिष्ठान्तु समाचरेत् ॥ अस्मै प्राणाः
प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च ॥ अस्यै देवत्वसंख्यायै स्वाहेति यजुरुच्चरन् ॥ अङ्गमन्त्रैरृङ्मन्त्रैर्वैदिकैरितपनेन च ॥ प्राणप्रति
ष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥ प्रतिमापूजने कुर्य्यादनेनापि च मन्त्रवित् ॥ प्राणप्रतिष्ठां प्रथमं पूजाभावविशुद्धये ॥ अस्मिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणप्रतिष्ठान्तु प्रतिमापूजनादृते ॥ नक्तं विष्णुवुधः कुर्य्यात्स्नात्वा सन्तुमवाप्नुयात् ॥ विष्णोरिष्टिमिमां कृत्वा ह्यादर्शपार्थि-
वोत्तमः ॥ तस्यामेव तु पूर्णायां प्रतिमां स्थापयेद्वुधः ॥ एवं दशाहरायां तु कृत्वेष्टिं पार्थिवोत्तमः ॥ सर्वान्कामानवाप्नोति निर्विघ्नो
पि सजायते ॥ श्रीपञ्चम्यां शिवदेवीकुन्देः संपूजयेत्तदा ॥ वासवं गजराजस्थमुपहारैस्तोषयत्नमैः ॥ लक्ष्मीतन्त्रे रामतन्त्रे वा वासुदेवं
पुरोहितं ॥ अत्रापि पूजने ग्राह्यं मराडलादिकमन्यथा ॥ एवं कृते पूजनेतु पञ्चम्यां च विशेषतः ॥ श्रीयुतोन्नपतिर्भूत्वा न श्रीहानिमा-
वाप्नुयात् ॥ सदाचारे विशेषेतु कथितस्तव पार्थिव ॥ निषेधेषु विशेषाणां मत्कृणुपेन प्रियस्यति ॥ संयुज्य च तथा विष्णुं शिवमग्निं
पुरन्दरं ॥ अदत्वा च तपादानं न भुंजीत नृपः क्वचित् ॥ हाययेदग्निहोत्रं तु नित्यमेव पुरोहितैः ॥ अकृत्वा ह्यग्निहोत्रं तु भुंजन्नरकमाप्नु-
यात् ॥ नारदितिगृहे राजा रत्नदीपविवर्जिते ॥ त्वयेत्तथा स्त्रिया सार्द्धं न कदाचन सम्विशेत् ॥ भुंजानः श्रीफलं नाद्यात्तथा धात्रीफल-
न्नृप ॥ वुद्धिक्षयकरा ह्येते माषश्चासवमृत्तिकाः ॥ निष्पावा तररवन्नाश्च वुद्धिवृद्धिकरा मता ॥ वुद्धिक्षयकरं त्रिंशत्यजेद्राजा च भो-
जने ॥ भक्षयेदम्बहं वुद्धिवृद्धिहेतुं नृपोत्तमः ॥ न पर्य्यान विहीनन्तु प्ररोहेदासनं नृपः ॥ न पारं न गजं नाश्वमारोहेदासनं शनैः ॥ नैक-
स्तु विचरेद्राजा कदाचिदपि निर्ज्जने ॥ मदहेतुं न भुंजीयात्कदाचिदपि भोजनं ॥ कदाचिन्नोपसेवेत ह्युष्ट्रमांसं मांसमेषुन ॥ दर्शस्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नंगयाश्राद्धे तिलैस्तर्पणमेव च॥ न जीवत्पितृको भूपः कुर्य्यात्कृत्वाथ माप्नुयात्॥ न क्षेत्रजापीन्द्र तनयान्राज्ये राजाभिषेचयेत्॥
पितॄणां श्राद्धपिण्डेषु औरसे तनये सति॥ औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च॥ गूढोत्पन्नापविद्धश्च भागाश्चैते तनया इमे॥ का
लीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा॥ स्वयंदत्तश्च दासश्च षडिमे पुत्रपांसुलाः॥ अभावे पूर्वपूर्वेषां परान्समभिषेचयेत्॥ पौ
नर्भवं स्वयंदत्तं दासं राज्ये न योजयेत्॥ दत्ताद्याश्चापि तनया निजगोत्रेण संस्कृताः॥ आयान्ति पुत्रतां सम्यक् अन्यबीजसमुद्भवाः॥ पितुर्गो
त्रेण यः पुत्रः संस्कृतः पृथिवीपते॥ आचूडान्तं न पुत्रः स पुत्रतां याति चान्यथा॥ चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः॥ दत्ताद्यास्त
नयास्ते स्युरन्यथा दास उच्यते॥ ऊर्द्ध्वन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप॥ गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेत्॥ पौनर्भवन्तु तनयं जा
तमात्रं समानयेत्॥ कृत्वा पौनर्भवं स्तोमं जातमात्रस्य तस्य वै॥ सर्व्वस्य कुर्य्यात्संस्कारान् जातकर्म्मादिकान्नरः॥ कृते पौनर्भवे स्तोमे सुतः
पौनर्भवः सुतः॥ एकोद्दिष्टं पितुः कार्य्यं न श्राद्धं पार्वणादिकं॥ क्रीडायावनितामूल्यैः सा दासीति निगद्यते॥ तस्यां योजायते पुत्रो दासः
पुत्रस्स उच्यते॥ न राज्ञो राज्यभक्तस्या विप्राणां नापि श्राद्धकृत्॥ अधमः सर्व्वपुत्रेभ्यः तं तस्मात्परिवर्ज्जयेत्॥ पुराणे सर्व्वशास्त्राणि सं
हितास्सुमुनिभिस्तान्॥ नाध्यापयेन्नृपः शूद्रैर्विहितानि यतेक्रुधा॥ यस्य राज्ये सदा शूद्रः पुराणं संहितां यथा॥ पठितं स्यात्स हीना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातृ नु

षु राजा राष्ट्रेन सान्वयः॥ यो ह्यन्यकामतः शूद्रं पुराणं संहितां स्मृतिं॥ पठन्नरकमाप्नोति पितृभिः सहबन्धुकुलं॥ शूद्रो ह्याविहितं ये यस्प
मंत्रउदाहृतः॥ न च यं विप्रवचं ज्ञा ह्यः शूद्रैस्स दैवहि॥ न योजयेन्नृपः शूद्रं स्ववहारस्य [illegible]ने॥ नियोजनतत्रेन भूपतामि श्रोतेन प
रूपते॥ दीर्घायुष्व भवे ल्लोके राजा चापि सहान्वयः॥ कांशं अङ्गमयं त्रेवा न हिंसाम जितेन्द्रियं॥ न क्रूरत्वं व्याधितं वापिन्नृपः कुर्यात्तु
रोहितं॥ कृपनस्य धनं राजा न गृह्णीयात्कदाचन॥ न द्विजानां न ध्यारजा धना नि च वकुन्यपि॥ नारोहेत्कामुको मत्तं गजं कुर्यात्त
दाचन॥ आरूढ्यकामुकं तत्तु परत्र न विषीदति॥ अनायुष्यं न कुर्यात्तु कर्म भूपः कदाचनः॥ सततं चायुषो वृद्ध्यै यजेत सकलैर्नरैः॥
नक्रूरं वारेनाष्टम्यां न च क्यान्नृपसत्तम॥ अञ्जनाभ्यञ्जने कुर्यात्ताम्बुलस्यापि भोजनं॥ अतिसूक्ष्मं तथा पूर्णां ग्रहणं चन्द्रसूर्ययोः॥
न लोकयेत्स्वयं धीमान्नरो भूपतयैव च॥ उत्पातं जायते तत्तु दिव्यं भौमं स्वशाप्रवतं॥ न्नेक्षेत यस्मान्नृपतिर्द्दष्टुनाशाय तस्य हं पुनः॥ स
र्वदामङ्गलं कार्यं धारयेत्सह दूर्वया॥ अवस्त्रां कादितं गात्रं नाविप्रेभ्यः प्रदर्शयेत्॥ न तोयेषु सुखं पश्येत्त्राद्यान्मांसानि पर्वसु॥ नारो
हयेत्खरोष्ट्रं च न नारीमपि गुर्विणी॥ एवं नयपुता राजा चतुरङ्ग विवर्द्धयेत्॥ आत्मानं सततं रक्षेत्॥ सदा वीर्यं विवर्द्धयेत्॥ वीजपू
यकं राजा भक्ष्यं भोज्यं च पानकं॥ वर्जयेत्क्षारशाकाद्या मत्पन्नं वकुलिकं॥ कांस्यराजनराङ्कस्य तोये पाने व्यवर्द्धनं॥ सुत्रातेसूत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वद्वीर्यक्षयकाणि विवर्जयेत् ॥ तामापः स्वर्णशीलानां पात्रस्य फलवर्म्मगोः ॥ भुक्त्वा हृद्विकरं तोयं न तु पाना यय त्वतः ॥ सर्व्वमूलेन
गुह्येषु सदाचारेषु निष्ठितः ॥ भुक्त्वैरु विविधान् भोगान् निन्द्रस्थानं व्रजेत् परे ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवमौर्व्वस्तु सगरं शंशं
समुनिपुङ्गवः ॥ शास्त्राणि चैव सर्व्वाणि सदाचारान् सगुह्यकान् ॥ बहुशः कथयामास सगराय महात्मने ॥ नवास्ति यत्तु और्व्वेणाक
थितं सगराय वै ॥ राजनीतिः सभानीति यच्चाम्य च्छास्त्रविस्तरं ॥ संहितासु पुराणेषु यच्चागमचयस्थितं ॥ सर्व्वमुक्त्वा स सगरायमुख्वा
दौर्व्वस्य धीमतः ॥ तेषां तु कथितं किञ्चित् तद्युष्मात् द्विजसत्तमाः ॥ विष्णुधर्म्मान्तरे पूर्व्वमयाऽहसि भाषितं ॥ राजनीतिं सदाचारं वे
दवेदाङ्गसङ्गतं ॥ रहस्यं सततं विष्णोः [illegible] द्विजसत्तमाः ॥ यच्चात्र दिन मन्त्र गदितं वार संज्ञायः ॥ शंशायच्छेदनन्तेषु युष्म
भ्यं कथितं मया ॥ अनुकं शंशयच्छेदि पुराणं कालिकाहृयं ॥ योऽभ्यसेत् सततं विप्रः सवेदानां फलं लभेत् ॥ ॥ इति श्री कालिका
पुराणे राजनीतिसदाचारविशेषादिकं समाप्तोऽध्यायः ॥ ८१ ॥ ॥ अथ धत्तुः ॥ ॥ संक्षेपतः सदाचारं विशेषं राजनीतिषु ॥ श्रु
त्वात द्वद्न्नाद्यैर्व्वः सगराय प्रोक्तवान् ॥ विष्णुधर्म्मोत्तरे तं त्रै वा फलं सर्व्वतः पुनः ॥ इम अं च सदाचारा दृष्टवानौ प्रसादतः ॥ भूये
न संशयाच्छिन्नि तयाऽउक्तस्त्वयाऽपुरा ॥ किञ्चिद्विप्रेन्द्र [illegible] कामः परं कौतूहलं च नः ॥ अवतस्य गति [illegible] वते च दलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कयो॥ वेतालभैरवौ यातौ पुरैव तपसोन्वितं॥ सर्वथैव कृतदारौ तौ तयोः पुत्रा न चाच्युतौः॥ नजातोप्यपवायातो यदि यातो द्विजोत्तम॥
ते चानु सम्प्रति द्विजोत्तमः स्नातुं संस्थानमद्भुतं॥ ॥मार्कण्डेय उवाच॥ ॥अपुत्रस्य गतिर्नास्ति निश्चितम्वेति सत्तमाः॥ अपुत्रैर्ब्रान्त्य पुत्रैर्वा
प्रभवन्ति दिवङ्गताः॥ जाता न यौ च तौ विप्रा धीरौ वेतालभैरवौ॥ तयोर्वंशान् प्रवक्ष्यामि शृणुराव नृचमहर्षयः॥ सम्पन्नौ सिद्धिमवाप्येवय
यौ वेतालभैरवौ॥ हरस्य मन्दिरं यातौ कैलासं प्रतिहर्षितौ॥ तदा हरस्य वचनान्नन्दितौ रहसि द्विजाः॥ प्राहेदं वचनं तथ्यं शान्त्वयन्निव
बाधकृत्॥ ॥नन्दी उवाच॥ ॥अपुत्रौ पुत्रजनने भवन्तौ शङ्कुरात्मजौ॥ यतस्तांजात पुत्रस्य सर्वत्र सुखभागतिः॥ पुत्रामनरकं पुत्रं विही
नः परि पश्यति॥ न तपोभिर्न धर्म्मैर्वा तस्मा चयितुमीश्वरः॥ केवलात् पुत्रजननान्तस्मान्मोक्षः प्रजायते॥ तदुत्पादयतं पुत्रान् भवन्तौ ८५
देवयोनिषु॥ अमर्त्यौ तां तु युवयोः क्षीरपानाद्जायते॥ कात्यायन्यां ततः पुत्रान् मर्त्या सु संसमाहितौ॥ तस्मा द्यथा तथ्या पुत्रानुत्पाद्य
सुरभी विषु॥ प्रियौ भवन्तौ सुरयोर्भवतान्नचिरादिभिः॥ ॥मार्कण्डेय उवाच॥ ॥तस्येति वचनं श्रुत्वा नन्दिनः प्रीतिमानसौ॥ एव
मेवं करिष्याव नन्दिनं प्रत्यभाषतां॥ ततस्तौ वचनं कृत्वा नन्दिनो वचनो हृदि॥ अवेक्षतां सुपुत्रार्थे व्रजन्तौना वितस्ततः॥ अथैक
दा भैरवौ सोऽउर्वशीमप्सरावरां॥ हिमवत्पर्वतः प्रस्थे ददर्श सुमनोहरां॥ अथ तां कामुको भूत्वा यथा चेसुरतोत्सवं॥ वेश्याभावा स्वसुप्री

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

के-

तासाय येस्व मुवाचतं ॥ ततस्तस्यां भैरवस्तु चकार सुरतोत्सवं ॥ प्रीतायामुर्वशी देव्यां सुप्रीतो भूत् ... लिभिः ॥ सुप्रीतायां मच्योर्वशीरूपां तेजोभि
भैरवस्य तु ॥ सद्यो जातो भवत्पुत्रो बालसूर्यसमप्रभः ॥ तं पुत्रं च परित्यज्ये ययौ स्वस्थानमुर्वशी ॥ आदाय तनयं पश्चात् भैरवः स्वपदं य
यौ ॥ संस्कृत्य तनयं तत्तु भैरवो मोदसंयुतः ॥ सुवेशमिति तन्नाम्ना चकार सगणाधिपः ॥ अथ तं जातवयसं बालसूर्यसमप्रभं ॥ विद्याध
राधिपस्यैव सुवेशमतस्य बेवयेत् ॥ स तु विद्याधराध्यक्षस्तनयामतिसुन्दरी ॥ कामां गन्धर्वराजस्य चतरो ग्राहयस्य तु ॥ तस्यां त्व
स्य सुतो यज्ञे तरुत्रीमयमहारथा ॥ तरुष्वतनयो बाहुसनाग्यागति जायता ॥ बाहोस्तु पुत्रश्चत्वारः तपनो कुमुदेश्वरः ॥ कुमुदाभूत्कनीया
न्तु पार्थ्वतां सुमनोहरः ॥ कुमुदस्य सुतो यज्ञे देवसेनो महाबलः ॥ स देवसेनः पृथिवीमवतीर्य मनोहरः ॥ मान्धातुर्यौवनाश्वस्य तनयां केशिनी
वधु ॥ वरवामास भार्यां थीमत्कुङ्कीमयस्तःसमी ॥ यौवनाश्वोपि मान्धाता शक्रस्य वचनाद्ददौ ॥ केशिनीमुपगम्याथ देवसेनातया सह ॥
वाराणस्यां शम्भुपूर्ये हरमाराधये च्चिरं ॥ आराधितो हरः प्रीतस्तस्तः प्रददौ वरं ॥ सोप्याह देहरात्रुसमादिष्टमेव हरद्वयं ॥ यावच्चन्द्रश्च सूर्यो
भविता भवति वनुसन्ततिः ॥ अस्यावेलगता जन्मशद्रुतस्ये वराजतं ॥ समन्तो मम वंशात्वं नित्यमेव भविष्यति ॥ इत्यादाय वरं सोपि
देवसेनो महाकृतिः ॥ शंकरस्य प्रदानेन चिरं तां बुभुजे पुरी ॥ देवसेनापि केशिन्यां जनयामास पुत्रकं ॥ स प्लुतास्कराव तो पूर्यना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनः कीर्त्तितस्तथा॥ सुमनाबृहद्दानश्च क्रतधीकास्तुबलः कृती॥ नीतौ विवेकी यते वै सर्वशास्त्रविशारदौ॥ सर्वे वंशकराः पुत्राः दे
वसेनस्य सत्तमाः॥ अ[illegible] यकालेतु संप्राप्ते देवसेनापि भार्यया॥ पुत्रेषु राज्यं निःक्षिप्य स्यातो विद्याधरः क्षयं॥ ततस्तेतस्यतन
याः कृत्वा सुमनसं नृपं॥ वसुराना दयः सर्वेतु भजुश्चोत्तमां श्रियं॥ जातः सुमनसेः पुत्रो स्त्रयः शूरा महाबलाः॥ सुमतिश्च विरू
पश्च सद्यः शास्त्रेतु पारगाः॥ सुमतेरभवत्कन्याः सुतः सद्यस्य डिंडिमः॥ विरूपस्य भवत्राविर्गोवे र्भित्रो भवत्सुतः॥ तेषांकलो
भवद्राजा कश्मानुविजयो भवत्॥ यो विजित्य क्षितिं सर्वां पार्थिवान् भूरितेजसा॥ शङ्करस्यानुमते चक्रे खाराडवं शतयोजनं॥
न तस्य सासीद्दहनपावकुपुत्रैः प्रतापवान्॥ आव हत्पर मां श्रीतिं ज्वलनस्य प्रतापवान्॥ ॥ अथ यतुत्तुः॥ ॥ स खपं खाराड
वं चक्रे विजयः शतयोजनं॥ तद्वृतं श्रोतुमिच्छामः कथयस्व तपोधन॥ ॥ मार्कराडेय उवाच॥ ॥ सोमवंशो भवद्राजा म
हासत्वो महाबलः॥ धीरः सुदर्शनो नाम चारुरूपः प्रतापवान्॥ ममवैरिरतानास्ति दूरे नातिमहाबलं॥ सिंहान्व्याघ्रा
न्स नुत्तार्थकचित्स्थापित पोधनान्॥ खाराडवी नाम नगरी मकरोन्नत्र शोभनां॥ त्रिंशद्योजनविस्तीर्णामायातं त्रातयोजनं॥
तत्र प्राकारसंयुक्तां आदीनाम्बुजतोरणाम्॥ निम्नाभिरति दीर्घाभिः परिखाभिः समावृतां॥ दीर्घिकाभिश्चोपवनै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालिका
२९३

र्वकुभिश्च सरोगलैः ॥ श्चाकीर्णा चतथा राष्ट्रे रत्नैरपि मानवैः ॥ सोत्सेवाः सततं यत्र जना देवाद्दिविस्थितान् ॥ स्पर्द्ध
न्ते च मुदा युक्ताः सर्वभोगसमन्विताः ॥ स वै सुदर्शनो राजा खात्वा भूमिं विदार्यते ॥ गंगां कनखलां देवीवाहयामास खा
ण्डवीम् ॥ अप्राप्य खाण्डवीमध्ये तेन खाते च वर्षिभिः ॥ वक्रानुवक्रा सा भूत्वा पातितश्चीतां नदी प्रति ॥ सा जित्वा सकलाल्लोकान्पान्
वित्वा मोहतसभूमिपः ॥ राष्ट्री चकार खाण्डव्यामध्ये रत्नैरनेकशः ॥ अमेयां नगरे यस्तु जनानानीय भूपतिः ॥ खाण्डवीं वासया 301
मास हृष्टादित्सुदर्शनः ॥ देवदानवगन्धर्वान् जित्वा जित्वा युवा कृती ॥ देवद्वन्द्वं देवरत्नं देवीन्द्रपितधौषधी ॥ खाण्डव्याएपया कालिका
[illegible]स भूपाले च सुदर्शनः ॥ स सहिष्णुरजिष्णुश्च भूपतिं तं सुदर्शनं ॥ कृत्वा पकारं वसुधां देवानाञ्चतथा न्ऽतां ॥ जगाम सा पतिं २९३
वीरं विजयं जयशालिनं ॥ सन्ध्या पहृत्वा सा वित्तं तद्वैरे सम्प्रयोजयेत् ॥ विजयं विरोत्वा महाबलपराक्रमः ॥ सुदर्शनस्य नृपते
रव स्कन्दमथाकरोत् ॥ वामहंसोल्पमेव स्कन्दं विजयश्च सुदर्शनः ॥ चतुरङ्गबलेनाथ युद्धायाभिमुखो भवेत् ॥ विजयो रथमारु
ह्यनियोज्य चतुरङ्गिणीं ॥ सेनां सुदर्शनं योद्धुं संमुखोभवदंजसा ॥ तदा महद्युद्धमासीद्विजयेन महात्मना ॥ सुदर्शनस्य नृप
तेर्वृत्रवासवयोरिव ॥ सुदर्शनस्य सेनानीर्हमन्त्रामात्यवीर्यवान् ॥ काञ्चनं रथमारुह्य विजयं संमुखो ययात् ॥ अक्षौहि
३२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रापात्तु सभास्य परिवाय समन्ततः॥ रुमन्तेशत्रुसेनानि मद्रु वन्तु घतायुधाः॥ विजयस्य च सेनानी संजयः परिवंजयः॥ नगानांकेन
जग्राह रुमन्तं सह सैनिकं॥ तयोर्म्महदभूत् युद्धं सेनान्योर्वीरयोर्म्महत्॥ ववर्षशरवर्षेणारुमत्वानथ सञ्जयं॥ कुर्वन्नपिम
हानादं गजें दृष्ट्वेव केशरी॥ रुमत्वानाय विंशत्या वाणैर्विव्याध सञ्जयं॥ क्षुरेप्रणा धनुस्तस्य विच्छेद शतहस्तवत्॥ सोपिका
र्मुकमादाय तदान्यत् संचयस्त्रिभिः॥ वाणैर्विद्धास्य भल्लेन धनुश्चिच्छेद तत्क्षणात्॥ शताश्वं च नागानां सहस्राणि
वपंचव ट॥ पत्तीनां वाजिनां त्रीणि सहस्राणि मनुत्तमः॥ सञ्जयो निजघान प्र वाणवर्षैः सुदारुणैः॥ अथान्यो द्धनुरादा
य रुमत्वान् कुपितो भृशं॥ भल्लेन सारथेरस्य शिरःकोपादपाहरत्॥ हयांश्चास्य चतुर्भिश्च वाणैर्निन्ये यमक्षयं॥ चतु
रःपंचभिर्विद्धा तौरविव्याध्यापि सञ्जयं॥ संजयोप्यतिवेगेन गदामादाय तत्क्षणात्॥ अवतीर्यारथात्तस्थ्या रुमन्तम
प्यधावत॥ अधावन्तं सञ्जयन्तु रुमत्वान् कृतहस्तकः॥ शरवर्षेण संछाद्य वारयामास तत्क्षणात्॥ गदयाभ्रामयन्ना
सोनिवार्य्य शरवर्षिणं॥ आससाद मरुत्वन्तं केशरीव महागजं॥ आसाद्य तां गदां गुर्वी माविव्याती व सञ्जयः॥ एकेनै
व प्रकारेण सरथं तं व्यपोथयत॥ स पपात महावीरः पृथिव्यां गदयाहतः॥ वज्राहतो यथा शैलः पृथुनावलमध्यगः॥ रुमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वन्नं निपतितं दृष्ट्वा राजा सुदर्शनः॥ शोककोपसमाविष्टमधुमद्दवणवकः॥ जज्वालाकुलदेहोपि क्रोधेनातीवसंयुतं॥ स्रा
त्र सजवनैरश्वैर्युक्तं वैयाघ्रकृत्तिना॥ रथं कांचनचित्राङ्कं सिंहध्वजविनिस्वतं॥ आयुक्तो धनुरादाय विस्फार्य च पुनःपुनः॥
स सैन्यं सञ्जयं राजा समाद्रवत वेगवान्॥ अथास्य निशितैः शास्त्रैः सेनामयृगतां भृशं॥ स हनत् सकलान् राजा मृगानिव मृ
गाधिपः॥ एकामक्षौहिणीमग्रगामिनीं विपुलौजसं॥ क्रोधदृप्येनस हनन्नमांसीवदिवाकरः॥ हत्वा द्युसो हणीमेकामासा
द्य संजयं नृपः॥ वाणैः षड्भिश्च विव्याध ध्वजमेकेन चिच्छिदे॥ स जयोप्यथ विंशत्या हृदि विव्याध सुदर्शनं॥ ललाटे चैकवाणेन
प्राविध्य हातहस्तवत्॥ क्षुरप्रेणासिकोदण्डं भित्वा वाहुः प्रतापवान्॥ सारथिं दशभिर्वाणैः पुनर्विव्याध सञ्जयं॥ कोदण्डम
न्यमादाय ततो राजा सुदर्शनः॥ नरदेवेणभीमेनाववधातीव संजयं॥ तयोर्महदभूद्युद्धं वलिविस्मयकारकं॥ शस्त्रैरस्त्रैत्सं
न्नैः क्षोणैर्वलिर्वासवयोरिव॥ ततः सुदर्शनो राजा भल्लेनास्य दृढं धनुः॥ चिच्छेद सारथिं चास्य जघान निशितैः शरैः॥ स्वयं सं
जग्मवाहान्तसंजयः परवीरहा॥ धनुरन्यत्समादाय परिकार्य सुदर्शनात्॥ विव्याध दशभिर्वाणैर्धनुरप्यच्छिनत् दृढं॥ श
रासनान्नरं राजा समादाय सुदर्शनः॥ सञ्जयस्य चतुर्वाहान् शरानैर्निमे यमक्षयं॥ अथो धनुश्च चिच्छेद तवैव्याध प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तंत्रिभिः॥ विरथश्छिन्नधन्वा च सञ्जयः खड्गचर्म्मभृत्॥ आदाय स सुरवेगात्ते ह्युद्रवत्कुपितोऽभ्यशं॥ तस्यापततं खड्गं क्षुरप्रेण सु
दर्शनः॥ द्विधा चिच्छेद भल्लेन चर्म्म चाप्यच्छिन्नत्तदा॥ अथ धृतं नदेघ्मेत सञ्जयः स्यन्दनोत्तमं॥ सुदर्शनस्य सूतं तु करेणाभ्यापा
तयत् क्षितौ॥ रथाभ्यासगतस्याशु संजयस्य सुदर्शनः॥ शिरः विच्छेद खड्गेन ततो सोभ्यपतत् भुवि॥ सपपात ततस्तस्य रथाभ्या
से महाबलः॥ कृत्तस्त्रपश्च नो रसोप्युभिन्नः सालवृक्षवत्॥ सञ्जयं पतितं दृष्ट्वा विजयः क्रोधसंयुतः॥ महता शंखनादेन
श्रापूर्य्य धुलभंस्थलं॥ रथेन स्वर्णचित्रेण आघुचर्म्म विराजता॥ केतुना वृषभेनाथ योजना द्वौ छिन्नेन च॥ नादयन्ककुभः
सर्व्वा रथो घपरिवेष्टितः॥ विमुञ्चन शरवर्षेणि समासदे सुदर्शनं॥ आसाद्य तं रूपोभूयो विजयः परवीरहा॥ हृदि विद्धा
त्रिभिर्बाणैस्तिष्ठ तिष्ठेति चाब्रवीत्॥ सुदर्शनोपि विजयं नदन्तं कुञ्जरोपमं॥ दशभिर्निशितैर्बाणैर्विद्धा चिच्छेद तद्धनुः॥ अ
थ छिन्नधनुर्बाणं यतः कमेरा त्रिभिः शरैः॥ निर्भिद्य त्वा थमहानादं ननादाति सुदर्शनः॥ सोपि धनुः समादाय कङ्कपत्रैस्त्रिभिः
शरैः॥ विव्याध हृदये वीरो विजयोपि सुदर्शनं॥ ततस्तु तं समुद्दिश्य महाशक्तिं सुदीपितां॥ नागकन्यां कोपयुक्तां लेलिहानामि
वातुलां॥ स्वर्णदण्डां सुतीक्ष्णाग्रां तैलधौतां सुनिर्म्मलां॥ समुद्यम्य विजयः क्रोधाद्दवं प्रति॥ सुदर्शनस्य हृदये सा शक्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रविवेश ह ॥ स विह्वलो रथोपस्थे धावन्नेव पाविशत ॥ तस्मिन्रथे हसमाने च्छन्नपनौ च सुदर्शने ॥ तस्याग्रे तत्क्षणात्पार्श्वे ये
स्थितां तत्र सैनिकाः ॥ तान्सर्वान्महन् क्षाजा क्षणमात्राद्द्विजोत्तमाः ॥ रथानां दशसहस्राणि तावन्त्येव च दन्तिनाम् ॥ पंचविंशत्
सहस्राणि वाजिनां च तपस्विनां ॥ लक्षत्रयं तु पत्तीनां क्षणमात्रा साधयो पययेत् ॥ स तु लब्ध्वा ततः संज्ञां धनुरादाय वेदहं ॥ शर
वर्षेणा विजयं सव वर्षसुदर्शनः ॥ निवार्य शरवर्षेण विजयन्तु सुदर्शनः ॥ भल्लेन कार्मुकं सज्यमस्य चिच्छेद तत्क्षणात् ॥ सा
रथेस्तु शिरःकायाद्भल्लेनापाहरत्ततः ॥ हयांश्च चतुरश्चास्य प्रेषयामास मृत्यवे ॥ अथैनं विरथं भूपं दशभिः कंकपत्रभिः ॥ 303
बिभ्याध हृदयप्रदेशेननादं च सुदर्शनः ॥ स छिन्नधन्वा विरथो गदामादाय वेगवान् ॥ विजयो विजयाकांक्षी सुदर्शनमधावत ॥
आपतन्तं महावीरं बाणैर्बैः सुदर्शनः ॥ ववर्ष वर्षासु यथा वारिदः पृथिवीधरं ॥ विजयः शरवृष्टीं तां प्रोक्षाद्य भ्रामरेण नचे ॥ २९५
गदाहस्तो रथारूढमाससाद च नन्त् क्षणात् ॥ आसाद्य तं महावीर्यं विजयो पसुदर्शनं ॥ अत्वेः प्रष्ठ ह च गदापातयामास भू
तले ॥ गिरेः शृङ्गं यथा तुंगं वज्राशनिविदारितं ॥ यथासुदर्शनो राजा दारितो गदया पतत् ॥ तस्मिन्निपतिते भूपः सेनापतिः स
सैनिकः ॥ भयात्संप्राद्रवन्त्सर्वा दिशश्च प्रादिशत्तथा ॥ नष्टेषु तस्य सैन्येषु विजयः खाण्डवीपुरीं ॥ प्रविश्य दहृणे तत्र राशी भू ३२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तान्गिरीनिव॥सुवर्णानाञ्च रत्नानां राशञ्च यान्बहुशः पुरः॥ दृष्ट्वा सरांसि तत्राथ प्रफुल्लकमलानिव॥ हंसकारण्डवानादैर्नो
दितानि समन्ततः॥ राशीन् सुवर्णरत्नानां पर्वतानिव विस्तृतान्॥ पुष्पितान् देववृक्षांश्च भ्रमद्भ्रमरभूषितान्॥ प्रासादविपु
लान् शुभ्रान् कैलाशसदृशान् भुजान्॥ विस्फुटांश्च सुगन्धाढ्यां प्रतिगेहे व्यवस्थितान्॥ उत्फुल्लनयनो राजा विजयः परवी
रहा॥ मेने मए वतीस्तानु पुरीं क्षितिगतामिव॥ तं वीक्ष्य तं नरपतिं नगरीं तां सुरेश्वरः॥ सभेत्य विजयं प्राह शान्तवंश्च क्षमायाचि
त॥ ॥इन्द्र उवाच॥ ॥राजन् सहासीद्देवानां गरातानामपि चोत्तमं॥ नरगन्धर्वयक्षाणां मुनीनाञ्च मनोहरं॥ सर्वानुत्साध्य देवीश्च
मम वापि प्रियेरतः॥ अक्षावलामिदं गुह्यं श्वाक्षाद्य च तपोधनं॥ रेवाराउवीं नगरीं चक्रे इह राजा सुदर्शनः॥ तादिदं पुनरेव त्वं व
नं कुरु नरोत्तमे॥ तत्राहं विहरिष्यामि तक्षकेन समं हरः॥ मुनीनाञ्च तपस्थानं मुक्तं लन्ते प्रसादतः॥ भविष्यति च यक्षाणां किंव
राणाञ्च पार्थिव॥ ॥मार्कण्डेय उवाच॥ ॥एतच्छ्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा॥ वनमेवाकरोद्राजन् रेवाराउवीं शक्रगौर
वात्॥ गच्छन्तु भोगयास्यान्न प्रजाः सर्वा यथेच्छया॥ येषां वाह्या त्रिलोकानां यथा जन्मगमने पुनः॥ गता रासी नेगच्छन्तु मयैव प्रति
पालिताः॥ ततस्तस्य वचः श्रुत्वा जनाः केचित् द्विजेपदं॥ जग्मुर्वाराणसीं केचित् द्विजयेनाभिपालिताः॥ ततो धनानां तान् राशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नरनारान्त्र पृथक् पृथक्॥ अन्यानां मङ्गलान्त्र कूप्यानां विजयस्तदा॥ दीर्घे दीर्घाहयामास पुरीं वारणसीप्रतियाग
स्वर्गानाञ्च देवानां यदानीतं हठात्पुरा॥ इत्येवमादिकं यत्नु विजयस्तत्प्रसादतः॥ तेस्ते त्रीतं च खाण्डव्याः स्वस्थानप्रति
भूषितैः॥ विंशद्योजनविस्तीर्णां त्रिंशद्योजनमायतां॥ तां पुरीं विजयश्चक्रेन चिरदेववैवनं॥ तस्मिन् शक्रस्य सम्मत्या त
क्षकः सहितो गुरोः॥ उवास सुचिरं तत्र ततो वै निर्जनं वनं॥ ततो देवाश्च गन्धर्वाः क्रीडन्त सरसाकुनाः॥ अन्ये सन्त विजयं भू
पवने सुविजयावहं॥ अष्टाविंशतिमे प्राप्ते युगे द्वापरशेषतः॥ वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत॥ दातुमङ्गीकृतं भि 304
क्षां तदा पाण्डुसुतेन वै॥ वह्निरूपं समास्थाय जिष्णुं वचनमब्रवीत्॥ अहमग्निः पाण्डुपुत्र यज्ञभागाति भोजनात्॥ व्याधि पुराण
तोहं तपोव्याधि ममत्वं नाशयाधुना॥ खाण्डवं नाम विपिनं सपक्षिमृगराजकं॥ यदि मां भोजयिष्यसि त्वं शक्रोपि श्वेतवा २९६
हन॥ तदा समेत्य गोव्याधिवर परास्यतिनोच्चरणेत॥ पुरानु विजयो राजा खाण्डवीनाम तां पुरीं॥ भुक्त्वा वनं यतः चक्रे तेन नतं
त्खाण्डवं वनं॥ तदर्थं देवविहितं वनं तच्छ्वेतवाहनं॥ विरोधात्तत्र शक्रस्य न स्वयं भोक्तुमुत्सहे॥ तस्मात्त्वाहि महाभाग यत्नं
तस्मिन्नियोजये॥ यथैतत्त्वं वनं भोक्तुं प्राप्नोमि त्वत्प्रसादतः॥ तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः॥ दाहयामा

३२३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सषिविपिनं तत्सर्वं प्राणि संयुतं ॥ देवकीतनयेनासौ वासुदेवेन पालितः ॥ खाण्डवं दाहयामास ज्वलनस्य
हितेरतः ॥ सुप्रीतः प्रददौ तस्माऽज्ज्वालाय महात्मने ॥ वह्निर्धनुश्च गाण्डीवं वारणां देवनिर्म्मितं ॥ अक्षयाग्रव
सुधीदिव्यं रूपं ताम्रं तुरंगहयान् ॥ हनुमतो ह्यधिष्ठानं महान्तं वानरध्वजं ॥ एवऊञ्च त्रिशिरवं स्त्री क्षणं दहनः सव्य
साचिने ॥ निरोगश्चाभवद्वह्निस्तदा जिष्णुप्रसादतः ॥ तैर्बाणैस्तेनु धनुषा तेन खेटकेन केतुना ॥ तदुग्रस्यन्दनेवा
पि विजिग्ये फाल्गुणो रिपून ॥ एवं भैरववंशे तु संप्राप्तो विजयान्नृपः ॥ खाण्डवं नाम विपिनं चचार सुमहाद्युती ॥
विजयस्य सुता जाता स्त्रयो दश महावलाः ॥ द्युतिमान् सौमदत्ती च भूरि प्रद्युम्न एव च ॥ क्रतुःतु राड्डा विरूपाक्षो वि
कान्तो पि धनञ्जयः ॥ प्रथर्वः पवनः केतुस्त पारिश्वर रोपमः ॥ एषां राजाभवद्धीरः भवदेवः परिन्तपः ॥ वाराणा
स्यां नगर्य्यां धेय तं लक्ष पुराकरोत् ॥ लक्षपत्नकरः सोपि नाम्नी त्रापि भविष्यति ॥ राजाद्भितो महाभागो
य योपरि कारत्तथा ॥ एषां पुत्रप्रभृते श्चया त्रेसर्व्वमिदं जगत् ॥ चिरेणरशिक्रः संरक्षां शाक्रो तिभुविमा दृशाः ॥ क्रमाद्भैरववंशेन व्याप्तं लोकमि
दं तदा ॥ एतद्वः कथितं विप्रसत्तानं भैरवस्यतु ॥ तेषां कृत्वा कथामात्रं नापु त्रो जायते नरः ॥ इदं यः कीर्त्तयेत्सम्यक् चरितं विजयस्य यत् ॥ सत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालिका २९७

तं विजयन्नस्य जायते न पराभवः॥ एकाग्रमनसा यस्तु शृणुयादिदमुत्तमं॥ तस्य वंशास्य विच्छेदो न कदाचिद्भविष्यति॥ ॥इति श्रीका
लिकापुराणे भैरववंशानुकीर्त्तनं आयः॥८८॥ ॥मार्क्कण्डेय उवाच॥ ॥वेतालस्य च सन्तानं शृणुवन्तु मुनिसत्तमाः॥ यच्छ्रुत्वा सर्व्वपापेभ्यः त
त्क्षणाद्देव हीयते॥ दक्षस्य तनया चासीत् सुरभिर्न्नाम नामतः॥ कामधेनुरिति ख्याता सर्व्वलक्षे। जगतां माता महाभागा सर्व्वलोकोपकारि
णी॥ तस्यास्तु तनया जज्ञे कापोतस्य प्रजापतेः॥ नाम्ना सा रोहिणी सि स्नासर्व्वकामदुघा रणं॥ तस्यायज्ञे श्रुनःशेफान्मुने रिति तपोज्ज्वला
ता॥ कामधेनुरिति ख्याता सर्व्वलक्षण संयुता॥ सा शिताभ्र प्रतीकाशा चतुर्वेदचतुःपदा॥ स्तनैश्चतुर्भिर्धर्म्मार्थकाम प्रसवकारिणी॥ सास्
तान्नु शरीरान्नु कालेन महता सती॥ निर्म्मलं यौवनं कामधेनुरूपं मनोहरं॥ तावद्दरन्तीमेरुपृष्ठे चारुरूपै रलंकृता॥ ददर्श स तु वेतालः का पुराण २९७
मुकः प्रत्यपद्यते॥ तत्र कामुकवेतालं विदित्वा कामधेनुका॥ पशुधर्म्मात्स्वयं भेजे तं पुत्रं शशाभृद्द्युतः॥ सोवापतस्यां परमःमा मोदं शा
क्रान्मजः॥ सा चापि परमां तस्मिन्मुदमायाति हर्षिता॥ तयोः प्रवृत्ते सुरते तस्यां गर्भो भवत्तदा॥ काले प्राप्ते तु सुषुवे कामधेनुर्महावृषं॥ सो 305
चिरेणैव कालेन सुमहान्वृषभो जयेत॥ महाककुदसंयुक्तः चारुशृङ्गसमन्वितः॥ उक्षिप्त विचरन्कर्णयुगलो दीर्घवालधिः॥ ककुद्
न च शृङ्गाभ्यां कर्णाभ्यां राशितो भवेत॥ विचरन्नद्दृशो देवैः शृङ्गैरविसिताचलः॥ वेतालस्त्वकरोत्तस्य नाम शृङ्गः इति द्विजाः॥ सतु श्र ३२४

ङ्गो ज्ञानशाली समाराधयदीश्वरं॥ सोपितुष्टो बलं तस्मै ददौ विश्वं महेश्वरं॥ तमेव वाहनं चक्रे कृत्वा देवत्वनुं वृषं॥ साश्चित्ययुग्मबलवा
न् पृथिवीधरणक्षमाः॥ भृङ्गो नाम महातेजा केनु प्राप्या भवेत् प्रभुः॥ भृङ्गो भूत्वा सतो यस्या कैङ्करस्य महावृषः॥ अतो भृङ्गि
मिति ख्याति मिति प्राप महेश्वरः॥ सतु भृङ्गो महादेव ध्यानाशन्नाक्कचित् क्वचित्॥ वत्सास्य गृहं गत्वा सुरभेस्तनयाः सुयाः॥ रूप
यौवनसम्पन्नाभेजे सम्पुरतेनताः॥ वत्सास्य गृहेगावःसर्वलक्षणसंयुताः॥ ति सूति सततं विप्राः तास्तु तस्य सुता पुनः॥ बहवस्तु समुत्प
न्नाः तेषांस्तु तिप्रसूतिभिः॥ सर्वं जगदिदं व्याप्तं ते भ्योयज्ञः प्रवर्त्तते॥ आज्येन देवास्तुष्यन्ति यज्ञा आज्यैः प्रतिष्ठिताः॥ यज्ञाधीनमि
दं सर्वं जगत्स्थावरजङ्गमं॥ तदाज्यं तु गवाधीन मतः सर्वं गवि स्थितं॥ तदिदं सकलं विश्वं गवाधीनं द्विजोत्तमाः॥ वेतालस्य च ता
गावो रक्ताः सर्वे प्रियाः सदा॥ य इदं भृणुयान्नित्यं वेतालस्य महात्मनः॥ वत्सानां च सुविप्रोक्तं सम्पुखं बलवान् भवेत्॥ न गावो
नापि विभवास्तस्य नश्यन्ति वै क्वचित्॥ वेतालः सततं तस्य वक्ष सा चरित्तं स्वयं॥ इति वः कथितं विप्रा यथा वेतालभैरवौ॥ ज
नयामास तु पुत्रा वाहुत्य महाशयाश्च नः॥ यथा च कालिका देवी मोहयामास शङ्करं॥ यथोत्पन्ना शरीरार्द्ध कृतं शास्त्रोर्थ यथा तथा॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालिकायेन मत्स्यरूपं मितिसञ्ज्ञा यतेऽत्वहं॥ तस्य हस्त स्थिता मुक्तिस्त्रिवर्गस्तत्करानुगः॥ इति वः कथितं पुण्यं पुराणं कालिकाह्व
यं॥ मन्त्रवेदमयं शुद्धं ज्ञानदं मुक्तिदं परं॥ इति शुद्धतमा लोके वेदेषु च सदा द्विजाः॥ देवगन्धर्वपित्राद्यैः स्पृहनीहमिदं सदा॥
सुधान्तवसुतं मन्त्रो वशिष्ठेन महात्मना॥ इदं पुराण समस्तं तं कालिकाह्वयमुत्तमम्॥ तेन गुप्तमिदं सर्वे कामरूप सुरालये॥ तदि
दानीं समाख्यातं यत्कीर्त्तं महर्षयः॥ युष्माभिरपि नो देयं गोप्यं लोकेषु सर्व्वदा॥ शंखाये वल्लविन्नाधनास्ति कायाऽजिता
त्मने॥ भक्तिश्रद्धाविहीनाय न दातव्यं कदाचन॥ श्रद्धया श्रद्धया वापि स्खलुयाद्यः स ईश्वरः॥ त्रिंसःकोट्यश्च कोटीचती
र्थानां वा पुरव्रुवीत॥ तथात्र यानुयत्पुरांपतदस्य श्लोकमात्रतः॥ अधीतास्तेश्चतुर्वेदा येरिदेध्यायमात्रकम्॥ श्रुतं सङ्कु
ल्यवज्ञात्तु ते धन्यास्ते महेश्वराः॥ सन्ति यावन्ति पद्यानि यावन्मत्राक्षराणि च॥ यावन्ति गुणसूत्राणि पत्रास्य पक्षरपंक्तयः॥ तावद
ब्दसहस्राणि देवीलोके महीयते॥ यत्र देवी भगवती देवतारव्यापकः शिवः॥ ततः किं वाधिकं न्यास्त्वं त्रिषु लोकेषु गीयते॥ अ
ध्यायमेकं पद्यं वा श्लोकार्द्धं पाठमात्रकं॥ येऽश्रुतं पठितं वापि ते धन्या धरणीतले॥ अष्टादश पुराणानि वेदश्चत्वार एव च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साङ्गोपाङ्गाश्च विद्याश्च व्रतधर्म्माः सनातनाः ॥ कालीपुराणस्य परे कलां नार्हन्ति षोडशीं ॥ सत्यं सत्यं पुनः सत्यं भैरवाय शिवो
ब्रवीत् ॥ एतत्परतरं नास्ति रहस्यं भुवनत्रये ॥ पुराणं पवित्रमतुलं सर्व्वपापप्रणाशनं ॥ श्रीतिहं भव्यजनकं सर्व्वनिश्श्रेयसः प्रदम् ॥
इति दंपश्यते यत्तु पुराणं कालिकाह्वयं ॥ सकामानखिलान् प्राप्य शेषे सतममवाप्नुयात् ॥ मत्तिश्च लोलिखितं यस्य पुराणमिद
मद्भुतं ॥ यदि तिष्ठति विप्रेन्द्र नाविघ्नस्तस्य जायते ॥ यत्तु धीते प्रयत्नेन पुराणमिदमादरात् ॥ अधीता सकलावेदास्तेनेह द्वि
जसत्तमाः ॥ तस्मात्त्वाधिकोनास्ति कृतकृत्या विवस्वराः ॥ समहावलवांश्चोके चिरायुरपि जायते ॥ सर्व्वषां जनको ब्रह्मा विष्णुः
सर्व्वस्य पालकः ॥ हरोपि संहतिकरस्ते पितत्पुत्रतां गताः ॥ तन्तु रिञ्चं जगन्मूलं को वा वेद जगत्त्रये ॥ को द्विजन्मकृतैः पुण्यै गुरुपूजन
तत्परैः ॥ नरैः संप्राप्यते श्रोतुमप्राप्य भाग्यवर्जितैः ॥ यो लोकमीशाः सततं बिभर्त्ति यः पालयेद्दत्तकरः ख्ययः स्यात् ॥ इदं समस्तं त्रय
मंत्रशास्त्रं दीपस्वरूपञ्चनमोस्तु तस्मै ॥ प्रधानपुरुषो यस्य प्रपञ्चो योगिनां हृदि ॥ यः पुराणाभिधो विष्णुः प्रसीदतु सनातनः ॥
यो हेतुरग्र्यः पुरुषः पुराणः पुराणकृद्देदपुराणकेभ्यः ॥ परः परेभ्यश्च पुरारिरूपो ध्येयं तत्तन्नामपुराणशेषे ॥ इति सकलज
गद्विभर्त्ति या सा मधुरिपुमोहकरीनमोस्तु तस्मै ॥ वहति च वपुषा महेश्वरो यां प्रणमैतत्प्राणहितां शिवाख्यां ॥ ९ ॥ इति श्रीकालिकापुराणं समाप्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu